CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

6022

संशोधन-मण्डलग्रन्थमालाया द्वितीयं पुष्पम्

महेश्वराचार्येण विरचितो

वृत्तशतकाभिधो मुहूर्तग्रन्थः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संशोधन–मण्डलग्रन्थमालाया द्वितीयं पुष्पम्

महेश्वराचार्येण

(सिद्धान्तशिरोमणिकारस्य भास्कराचार्यस्य पित्रा)

विरचितो

वृत्तशतकाभिधो मुहूर्तग्रन्थः

नयराजपन्तेन

रामजीतेवारिणो दिनेशराजपन्तस्य च

सहायतामवलम्ब्य सम्पादितः

एकोनत्रिंशत् (२९) तमे नेपालस्य प्रजातन्त्रदिवसे

बाणत्रिपूर्णद्वि (२०३५) मिते वैक्रमाब्दे

सौरस्य फाल्गुनस्य सप्तमे (७) दिवसे सोमवासरे

संशोधन-मण्डलेन प्रकाशितः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमे संस्करणे
५०० पुस्तकानि

प्रकाशकम्-
संशोधन-मण्डलम्
नेपाले, काष्ठमण्डपे
१०/३७४ वटुसवलबहाले

मूल्यम्- [redacted]
10/-

मुद्रकः-
लुषमुद्रणालयः
नेपाले, ललितपुरे
पुलचोके

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समर्पणम्

लक्ष्मीपते ! वृत्तशताभिधस्य
महेश्वराचार्यविनिर्मितस्य ।
त्वत्सङ्ग्रहस्थस्य कृतः प्रकाशो
ग्रन्थस्य ते चित्तमुदे प्रभूयात् ।।
तव प्रयाणाद् गिरिशक्र१४७वर्षे
पञ्चत्रिखद्वि२०३५प्रमवैक्रमाब्दे ।
नेपालवासी नयराजशर्मा
पञ्चर्तु६५वर्षो वच एतदाह ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रस्तावना

प्रसिद्धगणितज्ञस्य बिभ्रतो भास्कराभिधाम् ।
पित्रा महेश्वराख्येन कृतो वृत्तशताभिधः ।।१।।
मुहूर्तविषयो ग्रन्थः स्वीयाभिर्मधुरोक्तिभिः ।
तज्ज्ञानां विदुषां चित्ते निधत्ते प्रीणनं महत् ।।२।।
लीलानाथेन विदुषा दैवज्ञानां शिरोमणेः।
तनूजेन कृता व्याख्या तस्य ग्रन्थस्य राजते ।।३।।
वाक्यानि पूर्वविदुषां सङ्गृह्णती निजोदरे ।
सा व्याख्या दैवविदुषां दृढयष्टीव राजते ।।४।।
व्यधायि सुप्रयत्नेन मूलग्रन्थप्रकाशनम् ।
अनुकूले विधौ व्याख्या सा प्रकाशनमेष्यति ।।५।।
प्रकाशनविधावस्मिन् रामजीः सखितां व्यधात् ।
भोलानाथोऽपि साहाय्यं प्रकाशनविधौ व्यधात् ।।६।।
महेशोऽपि दिनेशोऽपि प्रकाशनविधौ व्यधात् ।
सखितां तेषु सर्वेषु हृद् मे धत्ते कृतज्ञताम् ।।७।।
पञ्चत्रिव्योमचक्षुर्भि २०३५ र्मिते वैक्रमवत्सरे ।
ऊनविंशे कार्तिकस्य घस्रे सौराद् रवेर्दिने ।।८।।
नेपालदेशवास्तव्यो नयराजाभिधो द्विजः ।
मौहूर्तान् प्रत्नतत्त्वज्ञांश्चैतद् ब्रूते कृताञ्जलिः।।९।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृत्तशतकस्थानां प्रकरणानां समुद्देशः

विषयाः	पृष्ठसङ्ख्याः
मङ्गलाचरणम्	१
संवत्सरादीनां संज्ञा ग्रन्थान्तराज् ज्ञेयाः	१
त्याज्यप्रकरणे	
शुभेषु कर्मसु त्याज्याः पदार्थाः	२
गण्डान्तदोषः	२
दण्डादयो दोषाः	२–३
तिथिवृद्धिक्षयरूपौ दोषौ	३
सूर्यादिवारेषु त्याज्या मुहूर्ताः	३
नक्षत्रप्रकरणे	
नक्षत्रस्वामिनः	३-४
नक्षत्राणां बाराणां च ध्रुवादिसंज्ञाः	४
संस्कारप्रकरणे	
गर्भाधानमुहूर्तः	५
पुंसवनसीमन्तोन्नयनयोर्मुहूर्तौ	५
जातकर्ममुहूर्तः	६
नामकर्ममुहूर्तः	६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जन्मनक्षत्रादिनिषेधः ६
शिशोर्निष्क्रमणमुहूर्तः ६
कर्णवेधमुहूर्तः ७
अन्नप्राशनमुहूर्तः ७-८
दक्षिणायने गुरुशुक्रयोरस्तमये बाल्ये वार्द्धके धूमकेतूदये ग्रहणादष्ट दिनानि यावच् च त्याज्याः पदार्थाः ८
गुरुशुक्रयोर्बाल्यवार्द्धकयोर्दिनानि ८
चूडाकर्मणि नक्षत्राणि ८
चूडाकर्मणि क्षौरकर्मादौ च त्याज्यास् तिथ्यादयः ९
क्षौरे निषिद्धा जना निषिद्धं दिनं च ९
विशेषः क्षौरकालः ९
चूडाकर्मणि लग्ननिर्णयः ९
व्रतबन्धे नक्षत्राणि ग्रहबलं च १०
व्रतबन्धे त्याज्या पदार्थाः १०
वेदानामधिपा ग्रहाः १०
व्रतबन्धे स्ववेदाधिपतौ केन्द्रस्थे बलवति तदीये वारे च शुभं फलम् १०
व्रतबन्धे लग्नगतसूर्याद्यंशफलम् ११
व्रतबन्धे केन्द्रगतसूर्यादिफलम् ११
व्रतबन्धे शुभा योगाः ११
व्रतबन्धेऽशुभा योगाः ११-१२
विद्यारम्भमुहूर्तः १२
केशान्तमुहूर्तः १२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समावर्तनमुहूर्तः १२

विवाहप्रकरणे

विवाहे ग्राह्या कन्या १३
विवाहे मासाः १३
विवाहे नक्षत्राणि १३
विवाहादिमङ्गलकृत्येष्वशुभाः पदार्थाः १३
अभिजिद्-नक्षत्रस्य भोगः पञ्चशलाकावेधश्च १४
सप्तशलाकावेधः १४
पादवेधः १४
लत्तादोषः १४
चण्डायुधदोषः १५
एकार्गलदोषः १५

दम्पत्यो राशिनक्षत्रविचारः

भकूटविचारः १५-१६
नाडीविचारः १६
गणविचारः १६
योनिविचारः १६-१७
भकूटदोषापवादः १७
राशीनामधिपा ग्रहाः १७
ग्रहाणां शत्रुत्व-मित्रत्व-समत्व-व्यवस्था १७-१८
ताराकूटविचारः १८
वश्यकूटविचारः १८
गुरुशुद्धिविचारः १८

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवाहे ग्रहयुतस्य चन्द्रस्य फलम्	१८
षड्वर्गः	१९
विवाहे नवांशकविचारः	१९
नवांशसाधनम्	१९
होरासाधनम्	१९
द्रेष्काणसाधनम्	१९
द्वादशांशकसाधनम्	१९
त्रिंशांशकसाधनम्	२०
जन्मराशेर्जन्मलग्नाच् चाऽष्टमं लग्नं त्याज्यम्	२०
कर्तरीदोषः	२०
विवाहे ग्रहाणां शुभाशुभस्थानानि	२०-२१
विवाहे जामित्रदोषविचारः	२१
लग्नस्य सप्तमस्य च शुद्धिरशुद्धिश्च	२१
दृष्टिविचारः	२१
सिंहस्थे गुरावधिकमासे सूर्याचन्द्रमसोः क्रान्तिसाम्ये च शुभं कार्यं न कार्यम्	२१-२२
भावविचारः	२२
विवाहे सामान्यदोषाणामपवादः	२२
कालहोरासाधनम्	२२
यामार्द्धदोषः	२२-२३
यामार्द्धकुलिकदोषः	२३
मुहूर्ताः	२३
इष्टलग्नादिष्टघटिकानयनम्	२४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्न्याधानप्रकरणे

अग्न्याधानकालः	२४
अग्न्याधाने नक्षत्राणि	२४
अग्न्याधाने लग्नविचारः	२५
अग्न्याधाने त्याज्याः पदार्थाः	२५
अग्न्याधाने शुभा योगाः	२५

वास्तुप्रकरणे

गृहारम्भे मासाः	२६
गृहस्य क्षेत्रफलानयनमायसाधनं च	२६
आयवशाद् गृहद्वारम्	२६
गृहस्य नक्षत्रानयनं व्ययानयनं च	२६
अंशकसाधनमशुभोंऽशकश्च	२७
गृहनक्षत्रराशितो गृहगृहेशयोर्वर्णादिकूटविचारः	२७
एकशालस्य गृहस्य प्रस्तार्‌रचनापूर्वकभेदज्ञानम्	२७
एकशालस्य गृहस्य ध्रुवादीनि षोडश नामानि	२७-२८
गृहारम्भमुहूर्तः	२८
गृहारम्भेऽशुभा योगाः	२८
गृहप्रवेशमुहूर्तः	२८-२९

राजाभिषेकप्रकरणे

राजाभिषेकमुहूर्तः	२९-३०

यात्राप्रकरणे

यात्रायां नक्षत्राणि	३०
नक्षत्रशूलम्	३०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वारशूलम् ३१
पूर्वाद्यष्टदिक्षु योगिनीदोषः ३१
परिघदण्डाख्यदोषो दिग्द्वारनक्षत्राणि च ३१
ध्रुवादिनक्षत्रैः पूर्वाह्णादिकालविशेषे यात्रानिषेधः ३१–३२
दिगीशा ग्रहाः ३२
लालाटिकदोषः ३२
लालाटिकदोषापवादः ३२
अभिजिद्मुहूर्ते कुम्भमीनस्थे चन्द्रे च दक्षिणदिशं न गच्छेत् ३२
यात्रायां शुक्रबुधयोः सांमुख्यदोषः ३२
प्रतिशुक्रबुधदोषपरिहारः ३२
यात्रालग्ने स्थानवशतो ग्रहाणां शुभाशुभफलम् ३३
प्रस्थानविधिः ३३

गोचरप्रकरणे

सूर्यस्य गोचरफलम् ३३
चन्द्रस्य गोचरफलम् ३४
भौमराहुकेतूनां गोचरफलम् ३४
बुधस्य गोचरफलम् ३४
गुरोर्गोचरफलम् ३४-३५
शुक्रस्य गोचरफलम् ३५
शनैश्चरस्य गोचरफलम् ३५

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अरिष्टस्थानस्थितानां ग्रहाणां
वामवेधविधिना शुभफलम् ३५
शुक्लपक्षे गोचराद् द्वितीयपञ्चमनवमस्थानगतस्य
चन्द्रस्य शुभफलम् ३५
शुभफलदास्ताराः ३५

सङ्क्रान्तिप्रकरणे

सङ्क्रान्तिषु पुण्यघटिकाः ३६
मलमासक्षयमासलक्षणं, तत्र शुभकर्म त्याज्यम् ३६
गणकानां प्रतीत्यर्थं केषाञ्चन गतागतानां
क्षयमासकालानां प्रदर्शनम् ३६-३७

मिश्रप्रकरणे

नृपदर्शनमुहूर्तः ३७
हस्तिकर्ममुहूर्तः ३७
अश्वकर्ममुहूर्तः ३७
गोक्रयविक्रयमुहूर्तः ३८
गवां स्थानप्रवेशगमनादिषु निषिद्धः समयः ३८
हलप्रवाहमुहूर्तः ३८
बीजवपनमुहूर्तः ३८
कुम्भमीनस्थे चन्द्रमसि तृणकाष्ठादिसङ्ग्रहस्य
प्रेतदाहस्य च निषेधः ३८
हलचक्रम् ३९
बीजवपने चक्रम् ३९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भैषज्यकर्ममुहूर्तः ३९
रोगविमुक्तस्य स्नानमुहूर्तः ३९-४०
तडागकूपवाप्यादिजलाशयानां प्रारम्भमुहूर्तः ४०
लतापादपरोपणमुहूर्तः ४०
धनप्रयोगे निषिद्धनक्षत्राणि ४०
अन्धलोचनमन्दलोचनमध्यलोचनसुलोचनसंज्ञकानि
नक्षत्राणि तथा मध्यलोचनसुलोचननक्षत्रेषु
नष्टादिद्रव्याणामप्राप्तिः ४०
नूतनश्वेतवस्त्रपरिधानमुहूर्तः ४१
रक्तवस्त्रस्य रत्नादियुतस्य पदार्थस्य शङ्खस्य
हस्तिदन्तस्य च धारणमुहूर्तः ४१
वस्त्रादिपरिधाने विशेषः ४१
वस्त्रस्य मध्यमे तृतीयेंऽशे दाहादिदोषः ४१
देवस्थापनमुहूर्तः ४१-४२
शुभकर्मणि लग्ननवांशादिविचारः ४२
वृत्तशतकस्थानां प्रकरणानां समुद्देशः ४२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृत्तशतकम्

मङ्गलाचरणम्

श्रीगणेशाय नमः ।।

ब्रह्मेशचन्द्रेन्द्रदिवाकराग्नि-
वस्वादिरूपाणि सुरस्य यस्य ।
नत्वाऽच्युतं तं व्यवहारसिद्धयै
महेश्वरो वृत्तशतं करोति ।।१।।

संवत्सरादीनां संज्ञा ग्रन्थान्तराज् ज्ञेयाः

संवत्सरर्त्वयनमासदिनेशपक्ष-
तिथ्यृक्षयोगकरणाह्वयराशिभानाम् ।
लग्नादिभावनिचयस्य च लोकसिद्धाः
संज्ञास्तु वृत्तशतनाम्नि सदाऽत्र वेद्याः ।।२।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ त्याज्यप्रकरणम्

शुभेषु कर्मसु त्याज्याः पदार्थाः

यामार्द्धं व्यतिपातवैधृतिमहापातं सचण्डायुधं
त्याज्यं कर्मसु शोभनेषु शनिभूपुत्रार्करार्ह्विन्दुभिः।
युग् लग्नं कुलिकश्च दोषसहितं धिष्ण्यं तथैकार्गलः
पूर्वार्द्धं परिघस्य दर्शरविभूपुत्रार्किहोरा बुधैः ।।३।।

विष्कम्भाद्यघटीत्रयं ३ च नवकं ९ व्याघातवज्रोद्भवं
गण्डे षट्६ त्वतिपूर्वके च घटिकाः पञ्चै५व शूले सदा।

गण्डान्तदोषः

त्याज्याः सार्पमघान्तरे च घटिका गण्डान्तसंज्ञाऽब्धयः४
पूषर्क्षाश्विभयोस्तथा कुलिशभृद्नक्षत्रमूलाख्ययोः।।४।।

दण्डादयो दोषाः

नक्षत्रादिनसंयुतात् तिथि१५ धृती १८-
न्द्रै१४कोनविंशा१९ष्ट ८ दिक् १०
त्रिःसप्ता२१कृति२२तत्त्व२५ शैल ७–
विकृती२३ष्व५र्हृत्२४प्रसङ्ख्येषु च ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धिष्ण्येष्विन्दुयुतेषु दण्डकमुखा योगा भवन्ति क्रमाद्
वर्ज्याः कर्मसु शोभनेषु सुधिया सर्वेषु देशेषु ते ॥५॥

तिथिवृद्धित्रयरूपौ दोषौ

वाराणां त्रितयं तिथिः स्पृशति यो वारस्तिथीनां त्रयं
त्याज्यो-

सूर्यादिवारेषु त्याज्या मुहूर्ताः

ऽर्यम्ण इने दिने तु हिमगौ ब्राह्मस्तथा राक्षसः ।
पित्र्यग्न्योः क्षितिजे बुधे त्वभिजितो रक्षोऽम्भसोर्वाक्पतौ
तिथ्यंशौ पितृवेधसोर्भृगुसुते सार्पेशयोः सूर्यजे ॥६॥

इति त्याज्यप्रकरणम्

अथ नक्षत्रप्रकरणम्

नक्षत्रस्वामिनः

भेशा अश्वियमाग्नयः कशशिनौ रुद्रोऽदितिश्चाऽङ्गिराः
सर्पाख्याः पितृयोनयोऽर्यमरवी त्वष्टाऽनिलश्च क्रमात् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवेशज्वलनौ च मित्रसुरपौ रक्षोऽम्बुविश्वे हरि-
र्वस्वंभःपतयस्त्वजैकचरणाहिर्बुध्न्यपूषाह्वयाः ।।७।।

नक्षत्राणां वाराणां च ध्रुवादिसंज्ञाः

उक्तं ब्रह्मयुगुत्तरात्रयमथो भास्वान् ध्रुवाख्यं स्थिरं
चाऽदित्यानिलविष्णुभत्रययुतश्चन्द्रश्चराख्यश्चलः ।
पूर्वायाम्यमघायुतः क्षितिसुतः क्रूरस्तथोग्रः स्मृतः
शक्राग्न्यग्निभसंयुतः शशिसुतो मिश्रश्च साधारणः ।।८।।

दस्रर्क्षाभिजिदर्कपुष्यसहितः क्षिप्रो लघुर्वाक्पति-
श्चित्रामित्रभरेवतीमृगयुतो मैत्रो मृदुर्भार्गवः ।
ज्येष्ठामूलभवर्क्षसार्पसहितस्तीक्ष्णः शनिर्दारुणः
कर्माण्येषु समाह्वयानि नियतं प्रोक्तानि संसिद्धये ।।९।।

इति नक्षत्रप्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ संस्कारप्रकरणम्

गर्भाधानमुहूर्तः

लब्ध्वा चन्द्रबलं हृच्यूतौ स्वयुवतिं गच्छेत् सुतार्थी पुमाँ-
स्त्यक्त्वा रात्रिचतुष्टयं प्रथमजं मूलं मघां रेवतीम् ।
पक्षार्द्धं च चतुर्दशीं प्रमुदितः पक्षान्तदर्शौ निशं
श्राद्धस्याऽह्यदिनं दिनं दिननिशोः सन्धी च पर्वाण्यपि
॥१०॥

केन्द्र १।४।७।१०धर्मर्क्ष९पुत्र५स्थितैः साधुभिः
षट्६त्रि३रुद्रे११षु पापैर्विधावुद्गमे ।
सौम्ययुक्ते च पुंजन्मयोगे प्रियां
पुत्रकामो ह्ययुग्मासु रात्रिष्विशयात् ॥११॥

पुंसवनसीमन्तोन्नयनयोर्मुहूर्तौ

सीमन्तोन्नयनं बुधस्तुहिनगौ पुन्नामधिष्ण्ये स्थिते
कुर्यात् पुंसवनं च सूर्यदिवसे जीवस्य भौमस्य वा ।
पापैः षट्६त्रि३भव११स्थितै-
र्नृभवनस्यांऽशे विलग्ने तथा
सौम्यैः केन्द्र१।४।७।१० नवा९त्मजे५षु बलिनि
त्विन्दावभीष्टस्थिते ॥१२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जातकर्ममुहूर्तः

कार्यं सूनोर्जननसमये जातकर्मा-

नामकर्ममुहूर्तः

ऽथ नाम
पित्राऽन्यैर्वा जननदिवसाद् द्वादशे१२ऽह्नचाद्यके११वा ।
नक्षत्रैर्वा ध्रुवमृदुचरक्षिप्रसंज्ञैस्तु शुक्रे
केन्द्र१।४।७।१०स्थे वा सुरपतिगुरौ
वासरे सद्ग्रहाणाम् ।।१३।।

जन्मनक्षत्रादिनिषेधः

न जन्मधिष्ण्ये न च जन्ममासि
न जन्मकालस्य दिने[1] विदध्यात् ।
ज्येष्ठे न मासि प्रथमस्य सूनो-
स्तथा सुताया अपि मङ्गलानि ।।१४।।

शिशोर्निष्क्रमणमुहूर्तः

सूनोर्निष्क्रमणं गृहाद् निगदितं मासे चतुर्थे शुभे
यात्रोक्ते समये

१, जन्मकालीयदिने इति मूलपाठः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्णवेधमुहूर्तः

शिशोरथ करत्वाष्ट्रैन्दवेज्याश्विभैः ।
पौष्णादित्यभविष्णुमित्रवसुभैर्वेध्यौ तु कर्णौ गुरौ
लग्नस्थे शुभखेचरैस्त्रिभव११गैः क्रूरैर्विहीने तनौ
॥१५॥

अन्नप्राशनमुहूर्तः

मासि स्वगृह्यकथिते विदधीत सूनोः
संप्राशनं शुभदिने सनवान्नकर्म ।
पौष्णात् कराच् श्रवणतोऽदितितो द्वये च
ब्राह्मे सशीतकरभे तिसृसूत्तरासु ॥१६॥

सूर्ये केन्द्र१।४।७।१०मृतिष्टव्यया१२त्मज ५गते
धर्मे९ च कुष्ठी भवेद्
भौमे पित्तरुजान्वितोऽनिलरुजा युक्तस्तु सूर्यात्मजे ॥
क्षीणे शीतकरे कुभैक्षभुगिति प्रोक्तं च रिक्ते४।९।१४तिथौ
सौम्ये ज्ञानयुतो विधौ मखकरः पूर्णे तु सत्रप्रदः॥१७॥

गुरौ चिरायुर्भृगुजे च भोगी
कोणस्त्रिकोणा५।९द्य१ख१०सप्त७संस्थः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बन्धु४स्थितश्चाऽन्नहरोऽथ षष्ठो ६
मृत्यु८स्थितो मृत्युकरः शशाङ्कः ।।१८।।

दक्षिणायने गुरुशुक्रयोरस्तमये बाल्ये वार्द्धके धूमकेतूदये ग्रहणादृष्ट दिनानि यावच् च त्याज्याः पदार्थाः

चूडाकर्म-नृपाभिषेक-निलयाऽग्न्याधान-पाणिग्रहान्
देवस्थापन-मौञ्जिबन्धनविधीन् कुर्याद् न याम्यायने ।
देवेज्यास्फुजितोस्तथाऽस्तमितयोर्बाल्ये तथा वार्द्धके
केतावभ्युदिते तथा ग्रहणतो यावत् तिथिश्चाऽष्टमी ।।१९।

गुरुशुक्रयोर्बाल्यवार्द्धकयोर्दिनानि

बालः शुक्रो दिवसदशकं पञ्चकं चैव वृद्धः
पञ्चादह्नां त्रितयमुदयात् पक्षमैन्द्र्यां क्रमेण ।
जीवो वृद्धः शिशुरपि सदा पक्षमन्यैः शिशू तौ
वृद्धौ प्रोक्तौ दिवसदशकं वा परैः सप्तरात्रम् ।।२०।।

चूडाकर्ममुहूर्तः

चूडाकर्मणि नक्षत्राणि

नासत्यर्क्षश्रुतिमृगशिरोन्नासवेन्द्रार्कपौष्ण-
स्वातीत्वाष्ट्रादितिभवरुणर्क्षेज्यधिष्ण्येषु कार्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चूडाकर्मणि क्षौरकर्मादौ च त्याज्यास् तिथ्यादयः

चूडाकर्म क्षुररदनखानां च कर्माऽथ मुक्त्वा
रिक्ता४।९।१४ऽर्कार्किक्षितिसुतदिनं यामिनीं
सान्ध्यवेलाम् ।।२१।।

क्षौरे निषिद्धा जना निषिद्धं दिनं च

भुक्ताऽभ्यक्तनिरासनैश्च समरग्रामान्तरप्रस्थितैः
स्नातैर्नो नवमेऽहनीति विबुधाः क्षौरं न कार्यं जगुः ।

विशेषः क्षौरकालः

दीक्षाबन्धविमोक्षमृत्युसमयोद्वाहेषु भूपाज्ञया
विप्राणां त्वखिलेषु भेषु गदितं क्षौरं शुभं सूरिभिः ।।२२।।

चूडाकर्मणि लग्ननिर्णयः

केन्द्र१।४।७।१०स्थैः सबलैः सितज्ञगुरुभिश्चौलं,
ज्वरो भास्करे
पङ्गुत्वं रविजे मृतिस्तुहिनगौ क्षीणे तु केन्द्र-
१।४।७।१०स्थिते ।
भौमेऽस्त्राद् मृतिरष्टरिःफ१२रिपु६गे चन्द्रेऽशुभं
कीर्तितं
पापैः केन्द्र१।४।७।१०मृतिव्यय१२द्वि२सुत५गै-
र्धर्म९स्थितैश्चाऽशुभम् ।।२३।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्रतबन्धमुहूर्तः

व्रतबन्धे नक्षत्राणि ग्रहबलं च

चित्राहस्तमृगाश्विपौष्णगुरुभादित्यश्रविष्ठाश्रवो-
वाय्वृक्षेषु सितेज्ययोर्द्विजवरस्योक्तो बुधैर्भूभुजाम् ।
सूर्यक्ष्मासुतयोर्विधावथ विशां मौञ्जीनिबन्धः शुभः
सर्वेषां त्रिदशेशपूजित इने चन्द्रे बलाढ्येऽथवा ।।२४।।

व्रतबन्धे त्याज्याः पदार्थाः

नाऽनध्याये रविसुतदिने कृष्णपक्षे निशायां
सप्त७म्यां च क्रमशशि१३मितायां च रिक्ते४।९।१४
तिथौ च ।
मौञ्जीबन्धः सुरपतिगुरौ नीचराशिं प्रयाते
कार्यस्तज्ज्ञै रिपुभवनगे चाऽतिगे वा सिते वा ।।२५।।

वेदानामधिपा ग्रहाः

वेदानामधिपाः सुरेज्यसितभूपुत्रेन्दुपुत्राः क्रमात्

व्रतबन्धे स्ववेदाधिपतौ केन्द्रस्थे बलवति तदीये वारे च शुभं फलम्

केन्द्र१।४।७।१०स्थेऽधिपतौ बलेन सहिते वारे तदीये
व्रती ।
विद्यावान्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्रतबन्धे लग्नगतसूर्याद्यंशफलम्

रविभांशके निगदितः क्रूरो जडः शीतगोः
पाप्यारस्य पटुर्विदीज्यसितयोर्यज्वा च मूर्खः शनेः।।२६।।

व्रतबन्धे केन्द्रगतसूर्यादिफलम्

तिग्मांशौ भूपसेवी भवति हिमकरे वैश्यवृत्तिस्तु भौमे
केन्द्र१।४।७।१०स्थे शस्त्रवृत्तिर्हिमकरतनयेऽध्या-
पकश्च द्विजन्मा।
प्राज्ञः षट्कर्मकृत् स्याद् विबुधपतिगुरौ भार्गवे
दीक्षितस्तु
द्रव्यैः सौख्यैः समृद्धः खरकरतनये सेवकश्चाऽन्त्य-
जानाम् ।।२७।।

व्रतबन्धे शुभा योगाः

जीवे लग्नमधिष्ठिते भृगुसुते धर्मा९त्मजप५स्थे विधौ
शुक्रांशेऽखिलवेदविद्

व्रतबन्धेऽशुभा योगाः

रविसुतस्यांऽशे कृतघ्नोऽधनः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्याशीलविवर्जितस्तुहिनगौ षष्ठेऽष्टमेऽर्के च व्यसुः
सूर्यारार्कियुते विधौ भृगुसुते जीवेऽथवा निर्घृणः ।।२८।

विद्यारम्भे मुहूर्तः

हस्तादित्रितये तथा निऋतिभे पूर्वान्त्यभेष्वश्विभे
मित्रर्क्षे च मृगादिपञ्चसु शुभः प्रारम्भ आद्यैः स्मृतः
विद्यानां हरिभात् त्रये च दिवसे सूरेर्भृगोर्वा विदो
ऽनाध्यायाख्य-तदाद्यवर्जिततिथौ केन्द्र १।४।७।१०-
स्थितैः सद्ग्रहैः ।।२९।।

केशान्तमुहूर्तः

कर्म केशान्तसंज्ञं हि वर्षे स्मृतं
षोडशे चौलकर्मोक्तधिष्ण्यादिके ।
खेचरज्ञैर्

समावर्तनमुहूर्तः

व्रतानां विसर्गोदितं
कर्म यत् तद् व्रतोक्ते च धिष्ण्यादिके ।।३०।।

इति संस्कारप्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ विवाहप्रकरणम्

विवाहे ग्राह्या कन्या

ग्राह्याऽपक्षिभुजङ्गभीषणनदीवृक्षर्क्षसंज्ञोदिता
कान्ता रोगविवर्जिता ह्यकपिला कन्यां च तामुद्वहेत् ।

विवाहे मासाः

माघे फाल्गुनशुक्रयुग्मसहसि स्यात् सन् सवैशाखके

विवाहे नक्षत्राणि

मूलब्राह्ममघान्त्यमैत्ररविभस्वात्युत्तरास्वैन्दवे ।।३१।।

विवाहादिमङ्गलकृत्येष्वशुभाः पदार्थाः

धिष्ण्यं यद् ग्रहयुद्धगं दिविचरैर्विद्धं च लत्ताहतं
भिन्नं क्रूरयुतं विमुक्तमथ तद् भोग्यं च दिव्यादिकैः ।
उत्पातैस्त्रिविधैर्हतं च गदितं दोषान्वितं तद् बुधै-
र्माङ्गल्येष्वशुभं तदेव शशिना यावद् न भुक्त्वो-
ज्झितम् ।।३२।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभिजिद्-नक्षत्रस्य भोगः पञ्चशलाकावेधश्च

वैश्वान्त्यश्चरणेऽच्युतर्क्षघटिका आद्याश्चतस्रोऽभिजित्
तत्स्थे ब्राह्ममथाऽन्त्यमर्यमगते याम्यस्थिते मित्रभम् ।
सौम्यं वैश्वगते मघा श्रवणगेऽहिर्बुध्न्यभं हस्तगे
मूलस्थेऽदितिभं च वारुणगते स्वाती च विद्धा ग्रहे ॥३३॥
वेधोक्तर्क्षगतो यदा दिविचरो वेधस्तदा

सप्तशलाकावेधः

चेतरे

चक्रे सप्तशलाकके निगदितो वेधोऽन्यदा सूरिभिः ।

पादवेधः

आद्य१द्वि२त्रि३चतुर्थ४के निगदितः पादे ग्रहोऽधिष्ठितः
पादस्याऽब्धि४ तृतीय३ दस्र२ कु१ मितस्य स्यात् तु
भेत्ता क्रमात् ॥३४॥

लत्तादोषः

भं षष्ठं६ स्थितभात् पुरन्दरगुरुर्धिष्ण्यं तृतीयं३ कुजः
सूर्यो द्वादश१२मष्टमं८ रविसुतो हन्त्यग्रतो लत्तया ।
राहुर्ज्ञो भृगुजः क्रमाच् च नवमं९ भं सप्तमं७ पञ्चमं५
द्वाविंशं२२ शशलाञ्छनोऽखिलतनुः सन्ताडयेत् पृष्ठतः
॥३५॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चण्डायुधदोषः

धिष्ण्यात् सूर्ययुताद् मघा च यतिथा चित्राऽनुराधा श्रवः
सार्पान्त्ये च तथाऽश्विभात् स्मररिपोश्चण्डायुधं स्याद् विधौ ।
धिष्ण्यं तावतिथं गते

एकार्गलदोषः

ऽथ कुलिशे पुष्यं तु शूले मृगं
व्याघातेऽदितिभं मघां च परिघे पूर्वेऽश्विनीं शीर्षतः ॥३६॥
अश्लेषां व्यतिपातनाम्नि मतिमान् षष्ठेऽनुराधां न्यसेद्
चक्रे त्वाष्ट्रभमन्त्यभे निऋतिभं गण्डे च भे संयुते ।
रेखैकोर्ध्वगता त्रयोदश तथा तिर्यक् स्थिता यत्र च
स्यादेकार्गलसंज्ञितोऽर्कशशिनोस्तत्रैकरेखास्थयोः ॥३७॥

दम्पत्यो राशिनक्षत्रविचारः

भकूटविचारः

पञ्चत्वं ह्यथवा वियोगकलहौ राश्योस्तु षट्काष्टके
वैधुर्त्यं नवपञ्चमे विधनता द्विद्वादशे जायते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शेषेष्वर्थसुखात्मजाश्च विविधाः स्यादेकनाडी न चेद्
दम्पत्योर्भगणो निषिद्धफलदो वैरं भयोन्योस्तथा ।।३८।।

नाडीविचारः

पूर्वाभाद्रपदेन्द्रवारुणपुनर्वस्वर्यमर्क्षाश्विनी-
मूलार्द्रारविभैरथाऽन्तकमृगाहिर्बुध्न्ययोन्यन्वितैः ।
चित्रामित्रभवासवाम्बुगुरुभैरेकाख्यनाडी श्रवो
वैश्वस्वातिमघान्त्यवह्निभुजगब्रह्मर्क्षशक्राग्निभैः ।।३९।।

गणविचारः

पुष्यार्कश्रुतिचान्द्रपूषभपुनर्वस्वश्विनीमित्रभ-
स्वात्यो देवगणो मनुष्यभगणः पूर्वान्तकार्द्रोत्तराः ।
ब्राह्मं चाऽथ मघेन्द्रमूलवसुभत्वाष्ट्राग्निभेन्द्राग्निभं
सार्पं वारुणमासुरो नृसुरयोः पाणिग्रहे स्याद् मृतिः ।।४०।।

योनिविचारः

अश्वे भाव्यहिभोगिनः श्ववृकभुग्मेषा विडालोन्दुरु
चाऽखुर्गोमहिषावनुक्रमवशाद् व्याघ्रो लुलायस्ततः ।
द्वीप्येणौ मृगकुक्कुरं ह्यथ कपिर्वभ्रुश्च वभ्रुः कपिः
सिंहोऽश्वो ह्यथ केसरी पशुगजौ नक्षत्रयोनिस्त्वियम्
।।४१।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिंहेभं महिषाश्वमाखुवृकभुक् श्वैणं पशुद्वीपिकं
प्राहुर्वभ्रु भुजङ्गमं ह्यविकपि त्याज्यं हि वैरं महत् ।

भकूटदोषापवादः

मित्रत्वं ग्रहयोश्च पञ्चनवमे द्विद्वादशे चेद् भवे-
देको वाऽधिपतिः परस्परशुभा तारा शुभं स्यात् तदा
॥४२॥

सिंहो मीनयुतस्तुलायुतवृषो धन्वी कुलीरान्वितः
कुम्भः कन्यकया युतोऽथ मकरो द्वन्द्वान्वितोऽजोऽलिना ।
योगेष्वेव षडष्टकेष्वपि शुभो मैत्रीग्रहः स्याद् यदि
प्रागुक्तं च गुणत्रयं वशगृहं तारानुकूल्यं भवेत् ॥४३॥

राशीनामधिपा ग्रहाः

भेशा भौमसितज्ञशीतगुरविज्ञाः शुक्रभौमाङ्गिरो-
मन्दार्क्यङ्गिरसो

ग्रहाणां शत्रुत्व–मित्रत्व–समत्व–व्यवस्था

ऽथ भार्गवशनी शत्रू समो ज्ञो रवेः ।
येऽन्ये ते सुहृदो विधोस्तु सुहृदौ ज्ञार्कौ समाश्चाऽपरे
ज्ञो भौमस्य रिपू रवीन्दुगुरवो मित्राणि शेषौ समौ॥४४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्रोऽरिः शशिजस्य सूर्यभृगुजौ मित्रे च शेषाः समा
जीवस्य ज्ञसितौ रिपू निगदितौ सौरिः समोऽन्येऽन्यथा ।
मित्रे मन्दबुधावरी रविविधू शुक्रस्य शेषौ समौ
मन्दस्येन्द्रगुरुः समो बुधसितौ मित्रे तथाऽन्येऽरयः ।।४५।।

ताराकूटविचारः
दम्पत्योस्त्रि३नगे७न्दु१मार्गण५मिता हित्वा शुभास्तारका

वश्यकूटविचारः
मर्त्यानां वशिनो विहाय मृगपं भक्ष्याश्च तोयोद्भवाः ।
त्यक्त्वैकं हि सरीसृपं मृगरिपोर्वश्यास्तथा प्राणिनो
वश्यावश्यमिहाऽपरं च बभणुर्लोकप्रसिद्धेर्बुधाः ।।४६।।

गुरुशुद्धिविचारः
कन्यक्षात् त्रि३दशा१०द्य१षट्६स्थितगुरौ
पाणिग्रहः स्याच् शुभः
पूजास्नानविधानतो मृतिर्८सुहृत्४-
प्रान्त्य१२स्थिते नो शुभः ।
मौञ्जीबन्धविधिस्तथा हि

विवाहे ग्रहयुतस्य चन्द्रस्य फलम्
खचरैः शीतद्युतिः संयुतो
नारीणां विविधां शुचं प्रकुरुते
सौम्याङ्गिरोभ्यां शुभम् ।।४७।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षड्वर्गः

गृहं च होरा त्रिलवो नवांशो
द्विषट्कभागस्त्रिदशांशकश्च ।
क्रमेण षड्वर्ग उदीरितोऽयं
शुभश्च सौम्यग्रहजो ग्रहज्ञैः ।।४८।।

विवाहे नवांशकविचारः

कन्यातौलिकयुग्मसंज्ञभवनांशोढा कुमारी सती
स्याच् शेषेष्वसती सती तु कथिता धन्वंशके कैश्चन ।

नवांशसाधनम्

क्षेत्रेषु क्रियनक्रतौलिककुलीराद्या नवांशाः क्रमाद्
इष्टात् पूर्वनवांशकाः खखयमैः२००
क्षुण्णास्तनोर्लिप्तिकाः ।।४९।।

होरासाधनम्

सूर्येन्द्वोर्विषमे गृहे समगृहे होरे मृगाङ्कार्कयो-

द्रेष्काणसाधनम्

द्रेष्काणाः प्रथमा१ख्यपञ्च५नव९पानां

द्वादशांशकसाधनम्

स्वाद् द्विषट्१२ कांशकाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रिंशांशकसाधनम्

भूपुत्रार्किगुरुज्ञभार्गवलवाः पञ्चे५ष्टि५भाऽद्रौ७ष५वस्
त्रिंशांशा विषमेषु राशिषु बुधैः प्रोक्ताः समेषूत्क्रमात्
॥५०॥

जन्मराशेर्जन्मलग्नाच् चाऽष्टमं लग्नं त्याज्यम्

जन्मर्क्षादुदयाच् च लग्नभवनं स्यादष्टमं मृत्यवे

कर्तरीदोषः

कर्तर्यत्र विलग्नकस्य च विधोर्दारिदयूशोकप्रदा ।
लग्नर्क्षादथवा विधोर्दिविचरौ क्रूरौ व्यय१२द्वि२स्थितौ
सौम्याख्यावथवा यदा हि भवतः प्रोक्ता तदा कर्तरी
॥५१॥

विवाहे ग्रहाणां शुभाशुभस्थानानि

शीतांशुस्त्रि३धना२य११गोऽत्र शुभदः
प्रोक्तोऽम्बु४गोऽन्यैः शुभः
सौम्याः सप्तम७रिष्फ१२नैधन८गता
नेष्टा भृगुः षट्६त्रि३गः ।
सौम्यः कर्म१०गतोऽशुभश्च भृगुजो
जीवः शुभोऽन्त्ये १२परैः
पापाः षट्६त्रि३भवा११ष्ट८गाः शुभकरा
नेष्टोऽष्टमोऽ भूसुतः ॥५२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शन्यर्केन्दुकुजैर्मृतिस्तनु१गतैः सौम्यैश्च मृत्यु८स्थितैः
चन्द्रेणाऽष्ट८रिपु६स्थितेन रविणा जामित्र७संस्थेन च ।

विवाहे जामित्रदोषविचारः

लग्नाच् शीतकराद् ग्रहा द्यून७गता नेष्टा विवाहे स्मृताः
कैश्चित्त्वाद्यनवांशकादिषुशरै५५स्तुल्ये नवांशे स्थिताः
॥५३॥

लग्नस्य सप्तमस्य च शुद्धिरशुद्धिश्च

लग्नांशो निजनाथदृष्टसहितः पत्युः शुभार्थं भवेद्
वध्वाः स्वांशकसप्तमं यदि निजस्वामीक्षितं वा युतम् ।
प्राहुर्लग्नगृहं नवांशपतिना दृष्टं युतं वा परे
लग्नास्तं च नवांशसप्तमगृहस्वामीक्षितं चेच् शुभम्
॥५४॥

दृष्टिविचारः

पश्यन्ति क्रमशस्तृतीय३दशमे१० भे पादवृद्ध्या ग्रहाः
स्वस्थानाद् नव९पञ्चमे५ च चतुर-
स्राख्ये४।८ तथा सप्तमम्७ ।

सिंहस्थे गुरावधिकमासे सूर्याचन्द्रमसोः क्रान्तिसाम्ये च शुभं कार्यं न कार्यम्

सिंहस्थे सुरपूजिते न शुभदः पाणिग्रहो नाऽधिके

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मासि स्याद् न रसाद्र्क१२भेऽर्कशशिनो-
र्योगे समे क्रान्तितः ।।५५।।

भावविचारः

लग्नस्योदितभागगस्तनुफलं धत्ते ग्रहो योऽतिग-
स्तान् भागान् स भवेद् द्वितीय इतरेष्वेवं स्मृता कल्पना ।

विवाहे सामान्यदोषाणामपवादः

केन्द्रे१।४।७।१०षु द्यून७वर्जितेषु बलवान्
संस्थश्च दृश्यः सितो
दोषाणां द्विशतं शतं शशिसुतो लक्षं गुरुर्घातयेत् ।।५६।।

कालहोरासाधनम्

होरेशा रविवर्जितोदयलवाः पञ्चेन्दु१५भिर्भाजिता
नाड्यो दस्र२हता हृताश्च विषयै५-
रेवं हि कैश्चित् स्मृताः ।
प्रोक्तोऽयं गणनाक्रमो दिनपतेर्होरेश्वराणां बुधै-
र्मार्त्तण्डास्फुजिदिन्दुपुत्रहिमकृत्सौरेज्यपृथ्वीसुताः
।।५७।।

यामार्द्धदोषः

यामार्द्धं तु चतुर्थ४मर्कदिवसे चान्द्रे दिने सप्तमं७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूपुत्रस्य दिने द्वितीयक २मथो बौधे दिने पञ्चमम् ५ ।
देवेज्यस्य दिनेऽष्टमं ८ च दिवसे शौक्रे तृतीयं ३ तथा
षष्ठं ६ मन्ददिने त्यजन्ति सुधियो माङ्गल्यकार्ये सदा
॥५८॥

यामार्द्धकुलिकदोषः

मार्त्तण्डोदयतः स्मृता दिनपतेर्यामार्द्धनाथा ग्रहा
मार्त्तण्डात्मजभोग उत्तरलवस्तज्ज्ञैः शुभे कर्मणि ।
त्याज्योऽसौ कुलिकोऽथ सूर्यदिवसा-
दन्यैश्च शक्रा १४क १२दिग् १०-
वस्वष्टाङ्का ६ब्धि ४यमैः २ स्मृतः कु १रहितैः
रात्रौ तु तिथ्यंशकैः ॥५९॥

मुहूर्त्ताः

तिथ्यं १५शाः शिवसार्पमित्रपितरो वस्वम्बुविश्वेऽभिजिद्
ब्रह्मेन्द्रेन्द्रकृशानुकोणपतयोऽब्धीशोऽर्यमाऽन्त्यो भगः ।
एतेऽह्नोऽथ निशः शिवाजचरणाहिर्बुध्न्यपूषाह्वया
भेशाः सप्त भपोदिता हरिरवी
त्वष्ट्राऽथ वायुः क्रमात् ॥६०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इष्टलग्नाद् इष्टघटिकानयनम्

यः क्षुण्णादयनांशयुक्तसवितुर्भोग्यांशकैः स्वोदयाद्
रात्रौ षड्६भयुतस्य चाऽभ्रदहनै३० र्भक्ताद् विनाडीगणः।
युक्तः सोऽयनभागसंयुततनोर्भुक्तांशकैः स्वोदयात्
खाग्न्या३०प्तैर्विवरोदयैश्च सहितः षष्ठ्यु६०द्धृतो
नाडिकाः ।।६१।।

इति विवाहप्रकरणम्

अथाग्न्याधानप्रकरणम्

अग्न्याधानकालः

अग्न्याधानं दारकाले विधेयं
कैश्चित् प्रोक्तं तच् च दायादकाले ।

अग्न्याधाने नक्षत्राणि

शक्राग्न्योर्भे शक्रभे कृत्तिकायां
सौम्ये ब्राह्मे पुष्यपौष्णोत्तरासु ।।६२।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्न्याधाने लग्नविचारः

कर्किनक्रघटमीनविलग्ने
वांऽशके तनुगतेऽथ तदीये ।
लग्नगे कुमुदिनीदयिते वा
नाशमेति समितोऽपि हुताशः ।।६३।।

केन्द्र१।४।७।१०क्षोपचय३।६।१०।११त्रिकोण५।९
भगताः सूर्यारजीवेन्दवः
शेषास्तूपचय३।६।१०।११स्थिता यदि तदा-
ऽग्न्याधानमुक्तं शुभम् ।
चन्द्रे नैधन८गे म्रियेत युवतिर्भौमे द्युमानष्टमे ८
शेषैर्मृत्यु८गतै रुजा च सहितोऽग्न्याधानकर्ता भवेत्
।।६४।।

अग्न्याधाने त्याज्याः पदार्थाः

नो कुर्याद् हुतभुक्परिग्रहमिह क्षमापुत्रजीवेन्दुभि-
र्नीचस्थैर्विजितै रिपोर्भवनगैरस्तं गतैर्वा द्विजः ।

अग्न्याधाने शुभा योगाः

चापस्थे तनुगे गुरौ, क्रियगते सप्ता७म्बर१०स्थे कुजे,
शीतांशौ त्रि३षडा६य११गे दिनकरे
वा स्यात् तदा दीक्षितः ।।६५।।

इत्यग्न्याधानप्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ वास्तुप्रकरणम्

गृहारम्भे मासाः

कार्यः श्रावणमार्गशीर्षसहिते राधे नृपस्याऽलयः
पौषे फाल्गुनसंयुते, न च विधावग्रस्थिते पृष्ठगे ।
याम्योदङ्मुखमाद्यवृश्चिकतुलागोस्थे रवौ स्याद् गृहं,
प्रत्यक्प्राङ्मुखजं गृहं घटहरी कीटं च नक्रं गते।।६६।।

गृहस्य क्षेत्रफलानयनमायसाधनं च

आयाः स्युर्ध्वजधूमसिंहशुनकोक्षाणः खरेभोष्ट्रका,
दैर्घ्ये विस्तृतिसङ्गुणेऽष्टभविहृते ह्यायोऽथ शेषं भवेत् ।

आयवशाद् गृहद्वारम्

सर्वद्वार इह ध्वजो, वरुणदिग्द्वारं च हित्वा हरिः,
प्राग्द्वारो वृषभो, गजो यमसुरेशाशामुखः स्याच् शुभः
।।६७।।

गृहस्य नक्षत्रानयनं व्ययानयनं च

क्षुण्णे क्षेत्रफलेऽष्टभिर्भ२७विहृते शेषं च धिष्ण्यं भवेद्,
धिष्ण्ये सर्पभहृते व्ययः, शुभगृहं बह्वायमल्पव्ययम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अंशकसाधनमशुभोंऽशकश्च

युक्ते क्षेत्रफले व्ययेन गृहजैर्नामाक्षरैरन्विते
भक्ते वह्निभि३रंशका, न शुभदं नीडं द्वितीयांशकम्
॥६८॥

गृहनक्षत्रराशितो गृहगृहेशयोर्वर्णादिकूटविचारः

कार्या धिष्ण्यगृहैर्गृहेशगृहयोरुद्वाहवत् कल्पना,
नीडं यद् विषमायगं शशिबले ताराबले संस्थितम् ।
प्रोक्तं तच् शुभदं, करैर्यदि गुणाः सर्वेऽपि न स्युस्तदा
कुर्याज् ज्यौतिषिकोऽङ्गुलादिकमिह
क्षिप्त्वा विहायाऽथवा ॥६९॥

एकशालस्य गृहस्य प्रस्तारचनापूर्वकभेदज्ञानम्

न्यस्याऽदौ चतुरो गुरूल् लघुमधो दद्याद् गुरोः पूरयेद्
ऊर्ध्वस्थेन समं पुरोऽथ गुरुभिः संपूरयेत् पश्चिमम् ।
यावत् स्युर्लघवोऽखिला विधिरयं तावत् प्रसार्योऽसकृज्,
ज्ञेयं सद्ममुखात् प्रदक्षिणमिहाऽलिन्दो लघस्थानकः
॥७०॥

एकशालस्य गृहस्य ध्रुवादीनि षोडश नामानि

नामानि ध्रुवधान्यके जयमथो नन्दं खरं सद्मनः
कान्तं चाऽथ मनोरमं च सुमुखं दुर्वक्त्रसंज्ञं जगुः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रूरं ज्यौतिषिकाः सुपक्षधनदे नाशं त्वलिन्दैः क्रमाद्
आक्रन्दं विपुलाह्वयं च विजयं चेत्येकशालस्य च।।७१।।

गृहारम्भमुहूर्तः

प्रारम्भो भवनस्य वारुणमृदुस्वात्यर्कपुष्यध्रुवै-
र्वस्वृक्षण युतरथ त्रिभवषट्३।११।६संस्थैश्च पापग्रहैः।
सौम्यैः कण्टक१।४।७।१०धर्म९पञ्चम५गतै-
र्लग्ने स्थिरे स्याच् शुभः
कन्याचापनृयुग्ममीनगृहगे सूर्ये न कार्यं ।।गृहम्७२।।

गृहारम्भेऽशुभा योगाः

क्रूरे नंधनदगे मृतिर्गृहपतेरस्तं गतैर्दुर्बलै-
र्वाऽर्केन्द्वोर्ज्यसितैर्भवेदशुभदं नीचस्थितैर्वा गृहम् ।

गृहप्रवेशमुहूर्तः

हित्वा रिक्त४।९।१४तिथिं कुजार्कदिवसौ
तद्भागकर्क्षं चरं
तद्द्वाराभिमुखैः प्रवेश उदितः प्रारम्भधिष्ण्यैः शुभः
।।७३।।

भूपानां मृदुभिर्ध्रुवैः प्रविशनं यात्रानिवृत्तौ शुभं,
स्याद् भूयो गमनं चरर्क्षलघुभैर्, उग्रैर्मृतिर्भूपतेः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तीक्ष्णैर्भूपकुमारकस्य, नृपतेः पत्न्या विशाखाह्वये,
धिष्ण्ये हव्यभुजो गृहं प्रविशतां सन्दह्यते वह्निना
।।७४।।

जन्मर्क्षे जन्मलग्ने हृचुपचय३।६।१०।११भवने
वा विलग्नं प्रयाते
पापैः केन्द्र१।४।७।१०त्रिकोण५।९व्यय१२मृतिष्ठ-
रहितैः केन्द्र१।४।७।१०कोण५।९स्थसौम्यैः ।
कृत्वाऽदौ वास्तुपूजां जलभृतकलशं ब्राह्मणांश्चाऽग्रतोऽर्कं
वामं कृत्वाऽथ कार्यो नवतरभवने
तोरणाढ्ये प्रवेशः ।।७५।।

इति वास्तुप्रकरणम्

अथ राजाभिषेकप्रकरणम्

राजाभिषेकमुहूर्तः

लग्नेशजन्मेशदशेशसूर्यभौमैर्बलिष्ठैः क्षितिपाभिषेकः ।
ज्येष्ठाश्रवःक्षिप्रमृदुध्रुवेषु सौम्यग्रहस्याऽह्नि तिथावरिक्ते
।।७६।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लग्ने स्थिरे चोपचय३।६।१०।११स्थिते च
शीर्षोदये च क्षितिपाभिषेकः ।
शस्तस्त्रि३षष्ठा६य११गतैश्च पापैः
सौम्यैः ष६ड६ष्टा८न्त्य१२विवर्जितैश्च ।।७७।।

इति राजाभिषेकप्रकरणम्

अथ यात्राप्रकरणम्

यात्रायां नक्षत्राणि

मित्रर्क्षश्रवणाश्विपुष्यवसुभादित्यान्त्यहस्तैन्दवै-
र्यात्रा स्याच् शुभदानिलाऽनलमघाचित्राविशाखान्तकैः ।
आर्द्रासर्पभसंयुतैर्न शुभदा

नक्षत्रशूलम्

नैन्द्रीं व्रजेदिन्द्रभे,
याम्यां चाऽजपदेऽथ पश्चिमदिशं ब्राह्मेऽर्यमर्क्षे हृचुदक्
।।७८।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वारशूलम्

प्राचीं नेन्दुदिवाकरात्मजदिने, याम्यां न गच्छेद् गुरौ,
मार्तण्डास्फुजितोर्नं वारुणदिशं, नोदग्दिशं ज्ञे कुजे ।

पूर्वाद्यष्टदिक्षु योगिनीदोषः

चन्द्राङ्का१।९स्त्रिभवाः३।११ ककुप्सु तिथयो
विश्वेषवो१३।५ऽर्काब्धयः १२।४
षट्शक्रा६।१४स्तिथिपर्वता१५।७ दशयमा१०।२-
स्त्रिंशद्गजा३०।८ नो शुभाः ।।७९।।

परिघदण्डाख्यदोषो दिग्द्वारनक्षत्राणि च

दिग्द्वारर्क्षाणि चाऽहुः सुरपतिककुभः
सप्तसप्ताग्निधिष्ण्याद्
रेखां वाय्वग्निदिक्स्थां गमनमिह बुधो
लङ्घयित्वा न कुर्यात् ।
नो गच्छेद् दक्षिणाशां त्रिदशपककुभो
नैव सौम्यां प्रतीच्यैर्,
मैत्रेऽश्विन्यां च हस्ते सुरपतिगुरुभे
सर्वदिक्षु प्रयायात् ।।८०।।

ध्रुवादिनक्षत्रैः पूर्वाह्णादिकालविशेषे यात्रानिषेधः

आद्येऽह्नस्त्रिलवे ध्रुवर्क्षसहितैर्मिश्रैर्न यात्रा शुभा,
नो तीक्ष्णैरपरेऽशके, न लघुभैरह्नस्त्रिभागेऽन्तिमे ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्र्यंशे त्वादिमके निशोऽथ मृदुभैर्, उग्रैर्न मध्यांशके,
नाऽन्त्यांशे चरभैः, करश्रुतिमृगेज्यर्क्षैः शुभा सर्वदा
।।८१।।

दिगीशा ग्रहाः

दिङ्नाथा रविशुक्रभौमतमसो मन्देन्दुसौम्या गुरुर्

लालाटिकदोषः

दिङ्नाथे न ललाटगे प्रवसनं कुर्याद्

लालाटिकदोषापवादः

व्रजेत् केन्द्रगे ।

अभिजिद्मुहूर्त्ते कुम्भमीनस्थे चन्द्रे च दक्षिणदिशं
न गच्छेत्

तिथ्यंशेऽभिजितोऽथ मीनघटगे चन्द्रे न याम्यां व्रजेत्

यात्रायां शुक्रबुधयोः सांमुख्यदोषः

शुक्रे चन्द्रसुतेऽथ वा न गमनं कार्यं पुरः संस्थिते ।।८२।।

प्रतिशुक्रबुधदोषपरिहारः

नो तेषां प्रतिशुक्रयानमशुभं ये वत्सभृग्वङ्गिरो-
भारद्वाजवसिष्ठकाश्यपकुलोत्पन्नास्तथाऽत्रेः कुले ।
दुर्भिक्षे विषयप्लवे प्रतिसितं न स्याद् विवाहोत्सवे
तीर्थानां गमने तथैकनगरे ग्रामे च सौम्यस्तथा ।।८३।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यात्रालग्ने स्थानवशतो ग्रहाणां शुभाशुभफलम्

यात्रायां शुभदाः शुभा ह्यखिलगाः,
शुक्रो द्युन७स्थोऽशुभश्,
चन्द्रो लग्न१मृति८स्थितोऽशुभफलस्,
व्ययारिकर्मो३।११।६।१०गाः ।
पापाः स्युः शुभदाः, खरांशुतनयः
कर्म१०स्थितो नो शुभो

प्रस्थानविधिः

नत्वाऽग्नीन् द्विजदेवताः क्षितिपति-
र्ध्यायन् दिगीशं व्रजेत् ।।८४।।

इति यात्राप्रकरणम्

अथ गोचरप्रकरणम्

सूर्यस्य गोचरफलम्

षट्त्र्यायाम्बर६।३।११।१०गः स्वजन्मभवना-
दुष्णद्युतिः स्याच् शुभो
विद्धश्चेच् शनिवर्जितैर्व्ययतपः-
पुत्राम्बु१२।९।५।४गैर्नो ग्रहैः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्रस्य गोचरफलम्

खड्यायाद्यरिपुद्युने१०।३।११।१।६।७षु हिमगुः
स्याच् शोभनश्चेद् ग्रहै-
र्नो विद्धो विबुधैश्चतुर्थनवम-
च्छिद्रात्मजान्त्यद्वि४।९।८।५।१२।२गैः ॥८५॥

भौमराहुकेतूनां गोचरफलम्

शत्रुव्ययाय६।३।११गतः शुभः क्षितिसुतो
राहुश्च केतुस्तथा
धर्मान्त्यात्मज९।१२।५संस्थितैरिह भवेद्
विद्धो न चेत् स्याद् ग्रहैः ।

बुधस्य गोचरफलम्

स्वाष्टायाम्बुखशत्रु२।८।११।४।१०।६गश्च शुभदः
सौम्यो विचन्द्रैर्न चेत्
पुत्राद्यान्त्यतृतीयनैधनतपः ५।१।१२।३।८।९
संस्थैश्च विद्धो ग्रहैः ॥८६॥

गुरोर्गोचरफलम्

जामित्रायतपोधनात्मज ७।११।९।२।५गतो
देवेशपूज्यः शुभो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्धो न द्युचरैस्तृतीयमृतिख-
प्रान्त्याम्बु३।८।१०।१२।४संस्थैर्यदि ।

शुक्रस्य गोचरफलम्

आपुत्रायतपोव्ययाष्टम१।२।३।४।५।११।९।१२।८
गतः शुक्रो न विद्धः शुभो
मृत्यस्ताद्यवियत्तपस्त्रिभवषट्-
पुत्र८।७।१।१०।९।३।११।६।५स्थितैश्चेद् ग्रहैः ।।८७।।

शनैश्चरस्य गोचरफलम्

मन्दः क्ष्मासुतवत् स्मृतः स रविणा विद्धोऽपि नूनं शुभः

अरिष्टस्थानस्थितानां ग्रहाणां वामवेधविधिना शुभफलम्

खेटो वामविधावनिष्टफलदोऽप्युक्तः शुभः सूरिभिः ।

शुक्लपक्षे गोचराद् द्वितीयपञ्चमनवमस्थानगतस्य चन्द्रस्य शुभफलम्

स्याद् धर्मद्विसुत९।२।५स्थितः शुभफलः
पक्षे सिते चन्द्रमाः

शुभफलदास्ताराः

प्रोक्ता द्व्यष्टचतुर्थषष्ठनवमा२।८।४।६।९-
स्ताराः शुभाः सर्वदा ।।८८।।

इति गोचरप्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ सङ्क्रान्तिप्रकरणम्

सङ्क्रान्तिषु पुण्यघटिकाः

नाड्यः षोडश१६ पूर्वतश्च परतः पुण्या रवेः सङ्क्रमात्
त्रिंशत्३० कर्कटके स्मृताः प्रथमजा-
स्त्रिंशद्३० मृगे चोत्तराः ।

मलमासक्षयमासलक्षणं, तत्र शुभकर्म त्याज्यम्

मासः सङ्क्रमवर्जितश्च सुधिया वर्ज्यः शुभे कर्मणि,
द्वौ मासौ भवतो यदा न शुभदो मासस्तदा चोत्तरः।।८९।।

यत्र मासि रविसङ्क्रमद्वयं
तत्र मासयुगलं क्षयाह्वयम् ।
व्योमराम३०दिवसैर्भवेच्, शुभे
यज्ञकर्मणि विवर्जयेद् हि तत्।।९०।।

गणकानां प्रतीत्यर्थं केषाञ्चन गतागतानां क्षयमासकालानां प्रदर्शनम्

मासोऽयं युगशैलखेचर९७४मिते शाके क्षयाख्यो गतो
यास्यत्यक्षभवेन्दु१११५भिः परिमिते
षड्बाणसूर्यै१२५६स्तथा ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्यो नागनगाग्निभू१३७८परिमिते सौम्येऽपि पुष्ये ततः[२]
प्रायस्तद् रविसङ्क्रमेण रहितं तत्राऽधिमासद्वयम् ।।९१।।

इति सङ्क्रान्तिप्रकरणम्

अथ मिश्रप्रकरणम्

नृपदर्शनमुहूर्तः

भूपालोकनमच्युतर्क्षवसुभैः क्षिप्रैश्च मैत्रैर्ध्रुवैः
कार्यं

हस्तिकर्ममुहूर्तः

चाऽदितिभाश्विपुष्यसहिते हस्तत्रये दन्तिनाम् ।

अश्वकर्ममुहूर्तः

सर्वं कर्म सुशोभनं च मुनिभिः प्रोक्तं हयानां तथा
पुष्यादित्यकरानिलाश्विवसुभेष्वन्त्ये मृगे वारुणे ।।९२।।

---

२. क्षयमासः प्रायो मार्गशीर्षे पौषे वा पततीत्यर्थः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोक्रयविक्रयमुहूर्तः

पूर्वाहस्तमृगाश्विभेषु वसुभे पौष्णानुराधाद्वये
शस्तौ गोक्रयविक्रयौ वरुणभादित्यद्विदैवेषु च ।
पुष्ये

गवां स्थानप्रवेशगमनादिषु निषिद्धः समयः

चाऽथ गवां कुहूदिनचतुर्दश्यष्टमीषु ध्रुवे
चित्रायां श्रवणे तथा न गमनं स्थानप्रवेशौ हितौ।।९३।।

हलप्रवाहमुहूर्तः

मूलक्षिप्रमृदुध्रुवर्क्षचरभज्येष्ठाविशाखासु च
स्यात् पित्र्ये च शुभा कृषिस्

बीजवपनमुहूर्तः

तु कृषिभैर्वीन्द्रश्रवोवारुणैः ।
बीजोप्तिः शुभदा स्मृता

कुम्भमीनस्थे चन्द्रमसि तृणकाष्ठादिसङ्ग्रहस्य प्रेतदाहस्य च निषेधः

तुहिनगौ कुम्भस्थिते मीनगे
नो कार्यस्तृणकाष्ठसङ्ग्रह इह प्रेतस्य दाहस्तथा ।।९४।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हलचक्रम्

सूर्याधिष्ठितभात् त्रि३वेद४विषया५-
ङ्का९शे१०श११विश्वा१३र्क१२कै-
स्तुल्यान्येष्यगतानि भानि मुनिभिः
प्रोक्तानि शस्तानि च ।
आद्ये लाङ्गलयोजने

बीजवपने चक्रम्

गुण३युगा४क्षा५ङ्का६द्रि७वस्व८ङ्क९दिक्१०-
सङ्ख्यान्येष्यगतानि बीजवपने
शस्तानि वस्वक्षि२८षु।।९५।।

भैषज्यकर्ममुहूर्तः

मित्रर्क्षेऽदितिभे मृगे निऋतिभे हस्तेऽनिलर्क्षेऽश्विभे
त्वाष्ट्रेऽन्त्ये श्रवणत्रये च गुरुभे भैषज्यकर्म स्मृतम् ।

रोगविमुक्तस्य स्नानमुहूर्तः

शीतांश्वास्फुजितोर्दिने ध्रुवपुनर्वस्वाहि[३]पित्र्यान्तिम-

---

३. अश्लेषानक्षत्रस्य देवता सर्पः । सर्पवाचकेनाऽहि-शब्देनाऽप्यश्लेषानक्षत्रस्य बोधो भवति । अत्र त्वहिस्थान आहिशब्दस्य प्रयोगो दृश्यते । तच् चिन्त्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वात्याख्येषु च रोगमुक्तमनुज-
स्नानं शुभं नो भवेत् ।।९३।।

तडागकूपवाप्यादिजलाशयानां प्रारम्भमुहूर्तः
मैत्राप्यध्रुवसौम्यपुष्यपितृभे प्रोक्तं करे वारुणे
वस्वृक्षे च तडागकूपखननं वाप्यादिकानां तथा ।

लतापादपरोपणमुहूर्तः
मैत्रर्क्षध्रुववारुणाश्विगुरुभेन्द्राग्न्यृक्षमूलार्कभे-[४]
षूक्तं गुल्मलतौषधीविटपिनां संरोपणं शोभनम् ।।९७।।

धनप्रयोगे निषिद्धनक्षत्राणि
मिश्रोग्रध्रुवतीक्ष्णभभ्वसनभैर्दत्तं प्रयुक्तं तथा
निक्षिप्तं द्रविणादि किञ्चिदथवा नष्टं पुनर्नैति तत् ।

अन्धलोचनमन्दलोचनमध्यलोचनसुलोचनसंज्ञकानि नक्षत्राणि तथा मध्यलोचनसुलोचननक्षत्रेषु नष्टादिद्रव्याणामप्राप्तिः
अन्धं मन्दविलोचनं चिपिटभं[५] दिव्येक्षणं ब्रह्मभाद्
नष्टं चाऽपहृतं धनं चिपिटभे दिव्येक्षणे नैति तत् ।।९८।।

---

४. मैत्रर्क्षध्रुववारुणाश्विगुरुभेन्द्राग्न्योर्भमूलार्कभे
इति मूलपाठः ।
५. चिपिटभं मध्यनक्षत्रमिति पीयूषधारा ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नूतनश्वेतवस्त्रपरिधानमुहूर्तः

वस्वृक्षेऽदितिभे ध्रुवेऽश्विगुरुभे पौष्णे करात् पञ्चके
धार्यं सूर्यबुधेज्यशुक्रदिवसे वस्त्रं सितं नूतनम् ।

रक्तवस्त्रस्य रत्नादियुतस्य पदार्थस्य शङ्खस्य हस्तिदन्तस्य च धारणमुहूर्तः

रेवत्यां करपञ्चके च वसुभेऽश्विन्यां च रक्ताम्बरं
धार्यं रत्नहिरण्यविद्रुमयुतं शङ्खेभदन्तौ तथा ॥९९॥

वस्त्रादिपरिधाने विशेषः

भूदेवानुमते विवाहसमये भूपप्रसादेन वा
धार्यं निन्द्यदिनादिकेऽपि वसनं प्रीत्याऽनुलब्धं तथा ।

वस्त्रस्य मध्यमे तृतीयेंऽशे दाहादिदोषः

दग्धं वा स्फुटितं तु गोमयमसीपङ्क्तैर्विलिप्तं तथा
नष्टं मूषकघूर्वकैरशुभदं मध्यं त्रिभागेंऽशुकम् ॥१००॥

देवस्थापनमुहूर्तः

आदित्यश्रुतिवासवध्रुवमृदुक्षिप्रैः सुरस्थापनं
कार्यं रिक्ततिथिं कुजस्य दिवसं पक्षं च हित्वाऽसितम् ।
स्थाप्योऽर्कश्च हरौ शिवश्च मिथुने कन्याविलग्ने हरिः
क्षुद्राख्याश्वरभे द्विमूर्त्तिभवने देव्यः स्थिरर्क्षेऽखिलाः
॥१०१॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृत्युद्वादश१२वर्जितैर्निगदिता
सौम्यैः प्रतिष्ठा शुभा
पापैराय११तृतीय३शत्रु६भगतैश्चन्द्रेण चाऽद्यैर्द्विजैः।

शुभकर्मणि लग्ननवांशादिविचारः

पापक्षेत्रभवांशको न शुभदः क्रूरर्क्षलग्नं तथा
कार्यं कर्म शुभं सिते शशिबलं लब्ध्वाऽसिते तारकाम्
॥१०२॥

इति मिश्रप्रकरणम्

वृत्तशतकस्थानां प्रकरणानां समुद्देशः

आदौ त्याज्यविधिस्ततो भगणगः प्रोक्तो विधिः संस्कृते-
हर्युद्वाहोऽग्निपरिग्रहो गृहविधिर्भूपाभिषेकः क्रमात्।
यात्रासङ्क्रमसङ्क्रमादिकविधिर्देवप्रतिष्ठाविधि-
श्चक्रे वृत्तशतं मनोरथसुतो दृष्ट्वाऽन्यशास्त्राण्यदः
॥१०३॥

इति श्रीमनोरथाचार्यसुतमहेश्वरविरचितं
वृत्तशतकं
समाप्तम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धिपत्रम्

पृष्ठे	पङक्तौ	अशुद्धम्	शुद्धम्
६	१४	त्याज्या	त्याज्याः
३	७	ऽ र्म्ण	र्य्यम्ण
७	३	वसुभैर्वेध्यौ	वसुभैर्वेध्यौ
१७	१४	ामत्रत्व	मित्रत्व
२१	१३	दष्टिविचारः	दृष्टिविचारः
२३	५	यामाद्धकुलिकदोषः	यामार्द्धकुलिकदोषः
२३	९	शक्रा १४ क १२	शक्रा १४ र्क १२
२७	१५	लघस्थानकः	लघुस्थानकः
२८	५	वंस्वृक्षण युतरथ	वंस्वृक्षेण युतैरथ
२८	८	कार्यं ।। गृहम् ७२।।	कार्यं गृहम् ।।७२।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्माकं काश्चन कृतयः

संशोधन-मण्डलेन प्रकाशिताः

१.	पूर्णिमा (१-३६ अङ्काः)	१४५।५०
२.	अभिलेख-सङ्ग्रह (१-१२ भागाः)	७।५०
३.	रत्नदीपाभिधः करणग्रन्थः	२।५०

नेपाल-सांस्कृतिक-परिषदा प्रकाशिताः

४.	जयरत्नाकरनाटकम्	८।
५.	त्रिरत्नसौन्दर्यगाथा	१०।
६.	ऐतिहासिक-पत्रसङ्ग्रह (१ भागः)	४।५०
७.	ऐतिहासिक-पत्रसङ्ग्रह (२ भागः)	३।५०

जगदम्बा-प्रकाशनेन प्रकाशिताः

८.	गल्लीमा फ्याँकिएका कसिङ्गर	६।२५
९.	इतिहास-संशोधनको प्रमाण-प्रमेय	१८।
१०.	श्री ५ पृथ्वीनारायण शाहको उपदेश (१-५ भागाः)	४१।

त्रिभुवनविश्वविद्यालयान्तर्गतेन पाठ्यक्रमविकासकेन्द्रेण प्रकाशिते

११.	गोलबोध	१३।७२
१२.	सुमतितन्त्रम् (त्रिभुवनविश्वविद्यालयान्तर्गतस्य संस्कृताध्ययनसंस्थानस्य नियोगेन सम्पादितम्)	